10 21

॥उत्सर्गकल्पाकरप्रारंभः॥
॥पत्र ३३॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

श्रीगणेशायनमः। उत्सर्गकमलाकरप्रारंभः नारायणनदात्मजश्रीमद्रामकृष्ण
सूनुना कमलाकरसंज्ञेनपूर्वसम्यगिहोच्यते १ अथमात्स्यात्कूजलाशयोत्स
र्गः सचोदगयनेमाघादिषट्सुकार्त्तिकेचश्रावणवर्जेसर्वमासेषुवाशुक्लपक्षे
हितीयातृतीयापंचमीत्रयोदशीपूर्णमासीषुतिथिषुबुधगुरुशुक्रवारेमृगशि
रसोमयोर्वाभरणीकृत्तिकार्द्रापुर्वासुआश्लेषामघापूर्वाविशाखावर्जनक्षत्रेषि
ष्कंभादिगंडव्याघातहर्षणवज्रव्यतीपातपरिघसाध्यवैधृतिवर्जयोगे राम
विष्टिवर्जकरणेमेषसिंहवृश्चिकधनुर्वर्जलग्नेबालवृद्धास्तगुरुशुक्रसिंह १

मकरवक्रातिचारगुरुमलमासक्षयमासलुप्तवर्षाभवदिनवर्जकालेचंद्रता
रानुकूलेकार्यः हेमाद्रौविष्णुधर्मे उदकेनविनातृप्तिर्नास्तिलोकत्रयेसदा।त
स्माज्जलाशयाःकार्याःपुरुषेणविपश्चिता अग्निष्टोमसमःकूपःसोश्वमेधसमो
परो कूपःप्रस्तुतिपानीयःसर्वेहरतिदुष्कृतं यमः तडागेयस्यपानीयंसततंस्व
लुतिष्ठति।स्वर्गेलोकेगतिस्तस्यनात्रकार्याविचारणा तडागकर्त्तावसतिस्व
र्गेयुगचतुष्टयं यत्रविप्रोथगौरेकापिवतेसलिलंक्वचित् तडागंतादृशंकृत्वा
स्वर्गेदशायुगंवसेत् नंदिपुराणे योवापीमथवाकूपंतडागंतोयवर्जितं स्वान

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

येत्मनरोयातिस्वर्गंप्रेत्यज्ञातंसमाः विष्णुः कूपारामतडागेषुदेवतायतनेषु
च पुनःसंस्कारकर्त्ताचलभतेमौक्तिकंफलं वह्निपुराणे। वापीकूपतडा
गानांकस्मिन्कालेसमुत्तः। कर्कटेपुत्रलाभश्चसौख्यंतुमकरेभवेत्। मीनेय
ोर्थलाभश्चकुंभेषुचबहूदकं। वृषेचमिथुनेचैवतृप्तिकेत्यजलंभवेत्।
पितृतृप्तिश्चकन्यायांसुलोयांज्ञाश्वतीगतिः। सिंहेमेषेधनुर्नाशमलक्ष्मी
र्द्विजयछतिाभविष्ये यस्मिन्सलिलसंपूर्णेकार्त्तिकेचविशेषतः। मुनयः
केचिदिछंतिव्यतीतेचोत्तरायणे नकालनियमस्तत्रसलिलंतत्रकारणं

राम
२

अथप्रयोगः कर्त्तोजलाशयपश्चिमोत्तरपूर्वेत्रिगानान्यतमदेशेमंडपंकृ
त्वातन्मध्येदेशकालौसंकीर्त्यसर्वपापक्षयपूर्वकरुद्रालयगमनानेककल्प
व्यापिस्वर्गलोकवासपरार्धद्वयकालव्यापिमहस्तपःप्रभृतिलोकग
मनभोगपूर्वकविष्णुपदप्राप्त्यर्थंश्रेयोद्वारामुकजलोत्सर्गयज्ञेनाहं यक्ष्ये

राये

जलाशयोत्सर्गंकरिष्यइतिवासंकल्प्य। गणेशपूजनंपुण्याहवाचनंमातृ
कापूजनंनांदीश्राद्धंवसोर्धाराःसप्तघृतासाः पवित्रमसीतिकृत्वासंपूज्यज्ञा
तिमंत्रेजप्त्वाचार्यसदस्यैर्ज्ञाप्यो। तथा॥ आचार्यमुयथास्वर्गेज्ञात्रादीनां

उत्सर्ग ३

बृहस्पतिः। तथास्मिन्मम यज्ञानां आचार्यो भवसुव्रतेति आचार्यवृणुय
त्॥ ऋग्वेदः यज्ञपत्राक्षोगायत्रः सोमदैवतः॥ अत्रिगोत्रस्तुविप्रेंद्र ऋत्वि
क्त्वंमेमरत्वभवेतियजुर्वेदिनो। सामवेद स्तुपिंगाक्षोजागतः शाक्वै
वतः॥ भारद्वाजस्तुविप्रेंद्र ऋत्वि०सामवेदिनो॥ हरंनेत्रोह्यथर्ववेदो नु
ष्टुभोरुद्रदैवतः॥ वैश्यांपायनविप्रेंद्र ऋत्वि०॥ इत्यथर्ववेदिनो॥ ततोम
धुपर्कोलं कारैः सर्वान्पूजयेत्॥ द्विगुणमाचार्याय॥ अत्रवारुणरीक्षो रा०
कैचिराहुः यथा॥ दंपत्योर्वस्त्रैः फलाक्षतान्बध्वाभिषेकंकृत्वायदाव ३

कांडा

ध्रमितिरक्तसूत्रंकरेबध्वास्वस्तिनइतितिलकंकृत्वादधिक्राव्णइति दृ
धिचंदनंकृत्वाकांडादितिदूर्वाभिर्मार्जयित्वाक्षतैर्दनंकृत्वाकरोतुस्वस्तिते चं
ब्रह्मास्वस्तिचापिदिजातयः। सरीसृपाश्चयेप्रेष्ठास्तेभ्यस्तेस्वस्तिसर्वदा॥ य
मानिर्नऋषभस्त्वेवधुंधुमारोभगीरथः। तुभ्यंराजर्षयः सर्वेस्वस्तिकुर्वंतुनित्य
शः॥ स्वस्तितेस्तद्विपादेभ्यस्तुभ्यादेभ्यएवं॥ स्वस्त्यस्तुभद्रंकेभ्यस्तनित्यंतव च
मस्तुमरुत्वतीय इत्यस्तांदत्वा। स्वंदीक्षितोसि॥ इत्यक्त्वा। व्रतीदीक्षामित्यादिपठे
युः। तदानकमलाकरस्थतुलापुरुषोक्तमार्गेणमंडपरंजोमद्ध्वजोछ्रय

णांतंकृत्वापूर्वेणेशेदिग्सुरंध्रतोरणतंयज्ञंरक्षस्वसर्वविघ्नानिवारय अग्नि
मीळेत्याद्यऋग्वेदाधिष्ठितायसुरंध्रतोरणायनमइतिपूजयेत्॥दक्षिणे।
यजुर्वेदाधिष्ठितायविकटतोरणायनमइति॥पश्चिमे॥सामवेदायसुकर्म
तोरणायनमइति॥उत्तरे॥अथर्ववेदाधिष्ठितायसुहोत्रतोरणायनमइति
पूजयेत्॥सर्वकलशेषु चंदीपादेयाः।पूर्वद्वारे॥धात्रेनमः।विधात्रेनमः।द्वा
रश्रियैनमः॥गणपतयेनमः॥वास्तुपुरुषायेतिपूजयेत्॥दक्षिणद्वारे॥बला
यनमः॥सबलायनमः॥द्वारश्रियैनमः॥पश्चिमे॥जयायनमः।विजयायन

मः॥द्वारश्रियै॰उत्तरे चंडायनमः॥प्रचंडायनमः॥द्वारश्रियैनमः इतिसंपू
ज्य॥ततोमंडपेशे॥ईशानस्तंभमारभ्यस्तंभेषुपूजयेत्।ब्रह्मजज्ञानं०।इदंविष्णुः
नमः शंभवेच०।त्र्यंबकं०।चित्रंदेवानां०॥गणानांत्वा०।यमायसोमं०॥
आयंगौः०।अश्विनावर्तिरस्म०।मरुतोयस्य०।उद्बुध्यध्वमित्रमरुः०।वायवा
याहि०।मध्यस्तंभेईशानादिजयाअत्रेति॥तमुत्वापाथ्यइतिमृक्।बृह
स्पतइतिगुरुं॥विश्वकर्मन्हविषेतिविश्वकर्माणं॥ततोवंशेषुकिंनरे
भ्यः।एरेपन्नगेभ्योनमः।पूर्वेनागेकिंचिद्भूमिमुपलिप्य।त्रैलोक्येयानिभू

तानिस्थावराणिचराणिच॥ब्रह्माविष्णुशिवैःसार्धंरक्षांकुर्वंतुतानिमे।दे
वदानवगंधर्वायक्षराक्षसपंनगाः॥ऋषयोमुनयोगावोदेवमातरएवच।स
र्वेमंधुरेरक्षांप्रकुर्वंतुमदान्विताः॥ब्रह्माविष्णुरुद्रक्षेत्रपालाणै
सह॥रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतः॥त्रैलोक्यस्थेभ्यःस्थावरेभ्यो
नमः।त्रैलोक्यस्थेभ्यश्चरेभ्यश्च तेभ्यः॥ब्रह्मणेनमः॥विष्णवेनमः।शिवा
यनमः।देवेभ्यो॰।गंधर्वेभ्यो॰।यक्षेभ्यो॰॥राक्षसेभ्यो॰।ऋषिभ्यो॰।मनुष्ये
भ्यो॰।देवमातृभ्योऽतिसंपूज्यबलिंसमर्प्यआचमेत्॥ततोयजमानोदक्षिण

राम॰ ५॰

तउपविश्य।यथाविहितंकर्मकुरुध्वमितिप्रेषेत्।आचार्योवेद्यांपंचव
र्णवितानंबध्नातिधरुलापुरुषोरुघ्रकारेणमंडलंविलिख्यवेदेः पूर्व
दिक्षुचतुरस्रार्धचंद्रवृत्तपद्मकुंडरूपचतुः कुंड्यांस्थंडिलेषुवाक्रमेण
ऋग्वेदादीन्होतृब्रह्मजापकानुपवेश्य॥ईशान्यांपंचमचतुरस्रेकुंडेग्नि
स्थापनादिप्रणीताप्रणयनांतंकृत्वास्थंडिलोपरिनिकुरुध्वमितिप्रेषयात्

लेप

ततःस्वेस्वेकुंडेस्वगृह्योक्तविधिनाग्नीन्स्थापयेयुः।एकस्मिन्नेवमाचार्यः।
ततआचार्योवरुणमंडलेवस्त्रेनवग्रहान् अधिदेवताःप्रत्यधिदेवताःवि॰

नायकादीन्यंचस्थापयित्वा॥मंडपकुंभेषु॥एह्येहिसर्वामरसिध्दसाध्येत्या
दिमंत्रैर्दशलोकपालांश्चसंस्थाप्यपूजयित्वा॥मंडपमध्येसुवर्णराजतमुक्ता
राजवर्त्तप्रवालपंचरत्नयुतांसौवर्णकूर्ममकॅराजतमत्स्यद्वंद्वभतांम्रमयकु २
लीरमंडूकलोहमयश्रिंशुसंयुतांसुवर्णपात्रीमिमंमेवरुणश्नुनःशेपोवरुणो
गायत्री॥इमंमेवरुण०।संस्थाप्य॥मंडपमध्येब्रह्मजज्ञानमितिब्रह्माणं॥
अवतत्यधनुस्त्वंपरमेष्ठीरुद्रोनुष्टुप्॥इतिरुद्रं।इदंविष्णुरितिविष्णुं॥गणा राम·
नांत्वेतिगणपतिं॥गंधद्वारामानंदकर्दमश्रीकर्दमसुताश्रीनुष्टुप्॥इ ६
तिश्रियं।जातवेदसइत्यंविकांतआयजंतइविंभोवनोविश्वकर्मभूतानित्रिष्टुप्इ
२

तिपंचभूतानिमात्स्ये॥वेद्यांशोपरितःकृत्वाग्रहांल्लोकपतिस्तथा।विन्य
न् सेन्मंत्रतःसर्वान्प्रतिदिक्षुविचक्षणः।ततःवेऽग्नारं॥ग्रहादीन्स्थापयेन्मध्ये
वारुणंमंत्रमाश्रितः॥ब्रह्माणं चत्रिवंविष्णुंतत्रैवस्थापयेद्बुधः।विनायकं
चविन्यस्यकमलांबिकांतथा॥शांत्यर्थंसर्वलोकानांभूतग्रामंन्यसेत्ततः
।एवंपंचदेवानांवाद्यसंपूज्यबलिंदद्यात्।गुडोदनंगरहेभ्यःअन्येभ्योघृतपा
यसं।लोकपालेभ्योमाषभक्तबलीन्मंत्रास्तु॥इंद्रस्तुसहस्रादीप्तःसर्वदेवा
धिपोमहान्॥वज्रहस्तोमहासत्त्वस्तस्मैनित्यंनमोनमः १ आग्नेयःपुरुषो

यस्तसर्वदेवमयोव्ययः।धर्मकेतुरनाधृष्यस्तस्मै·२ यमश्चोत्पलवर्णाभः किरी
टीदंडधरस्सदा॥धर्मसाक्षीविभुश्चात्मातस्मैनि·३ निर्ऋतिस्तूपुमान्कृष्णः स
र्वरक्षाधिपोमहान्॥खड्गहस्तोमहासत्वस्तस्मै·४ वरुणःशंखलोविभुःपुरुषो
निम्नगाधिपः॥पाशहस्तोमहासत्वस्तस्मै·५ वायुस्तुसर्ववर्णोयंसर्वगंधवहः
शुचिः।पुरुषोध्वजहस्तश्चतस्मै· ६ गौरोयस्तूपुमान्सौम्यः सर्वौषधिसम
न्वितः।नक्षत्राधिपतिःसोमस्तस्मै· ७ ईशानःपुरुषःशुक्लःसर्वविद्याधिपो रामः
महान्॥शूलहस्तोविरूपाक्षस्तस्मै· ८ योसावनंतरूपेणब्रह्मांडंसचराचरं॥ ७

पुष्पवधारयेन्मूर्ध्नि तस्मै· ९ पद्मयोनिश्चतुर्मूर्त्तिर्वेदव्यासः पितामहः।यज्ञा
ध्यक्षश्चतुर्वक्त्रस्तस्मै· १० ततोवरुणशिवविष्णुगणपतिकमलांबिकापंच
तानांपूजोपाघतपायसबलिंदत्त्वा।त्रैलोक्येयानिभूतानीत्यस्तूदेवतानां
पूजंकृत्वाबलिंदत्त्वा॥ततोहोरःस्वस्वकुंडवायव्येपंचवर्णैश्चतुर्वर्णैश्चतुर्वि
शतिदलंपद्मंकृत्वा।तत्रकलशंसंस्थाप्यतत्रगजाश्वरथावल्मीकसंगम
ह्रदगोकुलश्वभद्रोरोचनसर्षपगंधगुग्गुलान् अश्वत्थोदुंबरप्लक्षवटैश्च मन्त्रा
तिपल्लवान्पंचसागानक्षिप्त्वा।तत्रनद्यतेक्षमितिपंचभिर्वरुणंसंस्थाप्यसं

पूज्य॥गंगाद्याःसरितःसर्वाःसप्तांशिजलदाहृताः।सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः।आयांतुयजमानस्यदुरितक्षयकारकाः।अश्वत्थोभास्करोगंगानैमिषारण्यमेवच॥एतानिसर्वतीर्थानिदेवेस्मिन्निवसंतुमे।सरस्वतीगंडकीचकौशिकीसरयूतथा।एताश्चसरितःपुण्याःकलशेतुमेसदा।गंगेचयमुनेचैवगोदावरीसरस्वती।नर्मदासिंधुकावेरीजलेस्मिन्संनिधंकुरु॥इमंमेगंगे०।देवदानवसंवादेत्वाद्येत्यतीर्थान्यसेयुःततोयदाबध्नं०।येनबद्धोबलीराजेतिरक्तसूत्रंसर्वैर्हस्तेबध्नीयुः।ततःपूर्वकुंडपूर्वतःपदत्रयंहित्वारात्रि

रामः ८

मात्रंगृह्णीयात्तत्राक्षतान्दर्भाग्रप्रक्षिप्ययज्ञियक्षीरवृक्षजंत्रिरात्रियजमानमात्रंवाष्टाग्निमूर्ध्निवर्तुलंयत्पंक्तेरूर्ध्वंघटेनिरवायहरिद्रातैलाभ्यक्तमभिषिच्यसर्षपगोरोचनगुग्गुलदूर्वालिंबपत्राणांपोटलिकांबध्वायुवासुवासाइतिवासोयुग्मेनाच्छाद्यसंपूज्यलोकपालान्ब्रह्माविसृज्यान्यूपेसंपूज्य।एह्येहियज्ञध्वजधर्मराजत्रयीमयोवेदशरीरवपुंविधायवेदैश्वरयज्ञरक्षांबलिंगृहाणेममहंनमामि।इतिबलिंदत्वा मेर्वादिपर्वतान्वरुणंसंपूज्यपठेत् रे हिमेनुग्रहंयत्पंप्रसादंकुरुसुप्रभो॥मूलछेदेनयत्पापंमन्त्रभिघातेनपातकं।अ

दुष्कृतोपघातोस्तंसुपः पापंव्यपोहतु १ यद्काले यच्चकोमारेत्यापंवार्धकेकृतंत य
त्सर्वंममदेवेशायपः पापं०२॥ यन्निशायांतथाप्रातर्यन्मध्याह्नापराह्नयोः॥संध्य न्
योश्चकृतंपापंकर्मणामनसागिरा॥ सर्वंतन्ममदेवेशायपः पापं०३॥ याओ
षधीरितिपुष्पमालांबध्वागाद्मालिं गपुत्राद्युपेतोनमेत् यजध्वंहतिहोत्र
न् उत्कृष्टमंत्रान्जापेनतिष्ठध्वंहतिजापकान् ततः आचार्यंऋत्विजश्चसंसे
कुंडेस्वशाखोक्तविधिनाऽग्न्याधानाद्याज्यभागांतंकुर्युः॥तत्रबह्वृचस्यान्वा राम.
धानं॥ चक्षुषीआज्येनेत्यंतमुत्कात्रप्रधानं नवग्रहान्प्रत्येकमष्टाविंशति ९

संख्याकाग्निः समिदाज्यचर्वाकृतिभिः आधिदेवताः प्रत्यधिदेवताः विनायका
दिपंचदेवताः चतुःसंख्याकाग्निः समिदाज्यतिलाकृतिभिः इंद्रशिवमरुद्ग
णलोकपालदक्षविश्वकर्मणः प्रत्येकमष्टाविंशतिसंख्याकाग्निः समिदाज्य
तिलाकृतिभिः वरुणंअष्टोत्तरशतसंख्याकाग्निः उदुंबरसमिन्निलाज्याकृति
भिः त्र्यंबेणस्विष्टकृतमित्यादि आज्यभागांतेयजमानः इदंउपकल्पितंसमिदाज्य ज
तिलद्रव्यंनवग्रहेभ्यः आधिदेवताप्रत्यधिदेवताभ्यः विनायकादिपंचदेवताभ्यः
दिक्पालेभ्यः इंद्रशिवमरुद्गणेभ्योविश्वकर्मणेवरुणायचनमोनममेतित्य

उत्सर्ग· जेत्॥ततोद्वारपालादिजपेसहिँहोमकार्यः।मात्स्ये॥जुहुयाद्रुद्रपौर्मैत्रैराज्यं
१२ चसमिधस्तथा॥एकत्वमाचार्ये॥ऋत्विग्भिश्चैवहोतव्यावारुणैरेवसर्वज्ञः गृह्ये
भ्योविधिवद्धुत्वातथेंद्रायशिवायच॥रुद्रोलोकपालेभ्योविधिवद्विश्वकर्म
णे॥रात्रीसूक्तंचरौद्रंचपावमानंसुमंगलं॥जपेदन्योरुषंसूक्तं पर्वतोबहू
चाःपृथक्॥ॐऋंरौद्रंचसौम्यंचकूष्मांडंजातवेदसं॥सौरसूक्तंजपेदस्तेदक्षि
णेतुयजुर्विदः॥वैराजंपुरुषंसूक्तंसौपर्णंरुद्रसंहितां॥शिखिनंपंचनिधनंगाय एम·
त्रंत्रैष्टुभसामच॥वामदेवंबृहत्सौम्यंरौरवंसरथंतरं ग वांरुणंचकौर्णंचराक्षोघ्न १२

चयथाक्रमं।गायंतिसामगास्यक्पश्चिमद्वारमाश्रिताः॥अथर्वणाश्चोत्तरतः शां
तिकंपौष्टिकंतथा॥जपेदन्मनसादेवमाश्रितंवरुणंतथा बहुवचनाद्द्वारपाल
जापकश्चपठेयुः॥द्वारपालानांतुराद्यसूक्तंजपांतेचायंजपः।तत्रद्वारपालजाप
नि॥हिरण्यवर्णा० १५स्वादिष्टया०४सोमसूक्तं०१करिक्रदजुनुषं०४शंनइंद्राग्नी
०॥१५॥योजातएवसूक्तं॥कृणुष्वपाजः १५इतिबह्वृचानां॥नमस्तेरुद्राध्यायः।
सहस्रशीर्षादेवसवितःप्रसुवयज्ञंअध्यायः।ऋचंवाचंप्रपद्ये॥आदित्योवाएष
एतन्मंडलंतपतिमंत्रब्राह्मणंचयजुषां॥कयानश्चित्रइतिसूक्तं॥स्वाभिधिहवा

उत्सर्ग· मर्हे॥मूर्धानंदिवः अग्निंत्वाऽरा सहस्रशीर्षा॥आवोराजानंवर्गद्वयं॥देवजनि
११ ॥अबोध्यग्निः इमंस्तोममित्यादियुगानानि॥इतिसामगानां॥छेरोगायबृहद्गाय
इ१ अंगिरसोजन्मनोंरात्रीव्यख्यत्॥कदुंघ॥स्वादिष्ठया॥कनिक्रदत्॥सहस्र
शीर्षाइतिबहूचाः॥आप्रुषःशिशानः॥इमारुद्रायस्थिरधन्वने॥सोमोधेनुं॥यद्दे
वादेवहेडनं॥यस्त्वाहदेत्यनुवाकः॥सूर्योदेवीःषट्॥इतियजुषां॥पिबासोम॰
मिंद्रमंदतुत्वा॥सहस्रशीर्षा॥उद्वेदग्निंकृतामघं॥आवोराजानं॥उद्धातेजात राम·
मंधसइतिपंचनिधनंरहस्याधीतं॥तत्सवितुः॥मूर्धानंदिवः॥कयानश्चित्रआ ११

भुवन्॥स्वामिद्धिहवामहे॥संतेपयांसिपुनानःसोमधारया॥अग्निंत्वाऽरा॥ते
मन्वताग्निमीळे॥विभ्राट्॥अग्नेरक्षाणः॥अग्नीरक्षांसि॥अग्नेयुक्ष्वाहि॥बृह
द्दिवायगायत॥इतिसामगाः॥ओंनइंद्राग्नीत्यादिपूर्ववत्॥अथर्वणः॥सर्वेचां
तेवारुणजपंकुर्युः॥अथहोमः॥तत्रपूर्वकुंडेबहूचानांग्रहाधिदेवताप्रत्य
धिदेवता॥विनायकादिपंचदशलोकपालानांस्थापनमंत्रैरेवसमिदाज्यहो
मः॥वरुणस्यतु॥तत्त्वायामि॥तदिन्नक्तं॥त्वनःशेपोह्यवत्॥अवतेहेळ इतिच
तुर्भिः॥चतुर्दशावृत्त्याषट्पंचाशत्॥५६॥उदुत्तमंवरुणपाशंनोअग्नेसत्वं

नोअग्नेऽमंमे वरुणेतिचतुर्णोत्रयोदशाद्यास्त्रिपंचाशात् ५२
१२ एवमग्नौ समिद्धेऽाज्येन चरुं त्वा॥त्रातारमिंद्रमितीद्वस्य॥तमी
शानमितिशिवस्य॥मरुतोयस्येतिमरुतां॥विश्वकर्मन्हविषेतिविश्वकर्मणः
ब्रह्मादीनांचतन्नामंत्रैः समिदाज्यंकुर्त्वा॥स्विष्टकृदादिहोमशेषंप्राक्प्रणी
तात्रिमोकादिकुर्यात्॥अथदक्षिणेयाजुषाणं॥द्रव्यमंत्रव्याचपूर्ववआ॰
ज्यभागांतेऽमंमेतत्त्वायामित्वंनोअग्नेसत्वंनोअग्नेअयाश्चाग्नेयेतेशतंआ ग॰
दित्यास्त्वक्॥वनेषुव्यंतरिक्षंउद्वंसमंवरुणस्योपस्तंभनमसिनिषसादधृत १२

त ब्रूँइतिहादशानांनवादस्याः॥ऋक्संख्ययावरुणंयजतः॥आकूमेनऽमंदेवंअ
ग्निर्मूर्धाउदुध्यस्वदृदस्यतेअति॥अंनोत्परिस्रुतः॥त्रांनोदेवीकयानः॥केतुं
कृण्वन्॥ग्रहाणां॥त्र्यंबकंश्रीश्चतेयदक्रंदः विस्रोरराटंआब्रह्मन्त्सजोषाअ
सियमःकाविरसिचित्रावसोः अग्निंदूतंअप्स्वंतः स्योनापृथिवि॥इदंविष्णुःत्रा
तारंआदित्यैरास्त्रासिप्रजापतेनमोअस्तुसर्पेभ्यः ब्रह्मजज्ञानं॥गणानांत्वाअं
बेअंबिकेवातोवाउ र्ध्वाअस्याअश्विनोःत्रातारं॥अबतत्यधनुःमरुतोयस्य
त्रातारं॥अग्निंदूतंअसियमःएषतेनिर्ऋतेरमंमे॥वातोवावयंसोम॥तमीशा

नंनमोअस्तुसर्पेभ्यः ब्रह्मजज्ञानं॥विश्वकर्मन्हविषाइतिक्रमेणमंत्राःततो॰
१३ व्याहृतिहोमादिशेषंसमाप्य॥अथपश्चिमेसामगानां॥व्याहृतिहोमांतंपर्वांगंकृत्वा
होमः॥द्रव्यसंख्याचोक्ता॥उदुत्यं॥संतेपयांसि॥अग्निर्मूर्धा॥अग्नेविवस्वत्
रहस्यतेपरिदीया॥स्रुक्रंतेअन्यत्॥इंनोदेवी॥कयानः केतुंकृण्वन्॥आवो
राजानं॥आपोहिष्ठा॥स्योनापृथिवि॥इदंविष्णुः॥तमित्सप्रथाः इंद्रमिद्देवता
तये॥आयंगौः॥ब्रह्मजज्ञानं॥इंद्रऋष्विशेः॥अग्निंदूतं॥उदुत्तमं पृथिव्यंतरि॰ राम
क्षंसहस्रशीर्षा॥ इंद्रायेदोम्रजापतेनत्वत् तवेदिंद्रावमंवसुएषब्रह्म॥आत् १३

नःइमंस्तोमंऋणाश्विभ्रुः आदित्यत्तस्यएषेउषाः।त्वामिद्धिआत्वासोमस्यपव
मानाअसक्षतस्वादिष्टयातद्देगायसमानाअध्वरः ब्रह्मजज्ञानंविश्वकर्मन्
हु विषा॥ततःइमंमेवँत्तमंघृतवतीत्रयाणांवऋत्रिंशदाहुत्या॥१०८॥संख्या॥स्वि
ष्टकृदादिबर्हिर्होमांतं॥अथोत्तरकुंडेअथर्ववेदिनां॥अभ्यातानहोमांपर्वांग तं
स होमंकृत्वाहोमः॥विसौर्हिंश्रोकेधृमं॥त्वयामन्यो॥यद्राजानोविभजंतंवृहस्प
तिर्नोभ्रुक्षोअसि॥सहस्रबाहुः।दिव्यंचित्रंहस्तेएषुःमानोवदत्॥आपोहिष्ठा॥
यदाज्ञानंसमास्त्वाग्नेशंनोदेवीभूमेमातः इदंविष्णुः इंद्रजुषस्वप्रतपादोनक्षं

जातासिस पीनुसर्पयेदिशांपतिर्लक्ष्मएतनाजितं॥अंतरिक्षंवायवेन्राय
१४ तःसचेनयथा॥दूदमिंद्रवर्धय॥मानोविदत्॥मरुतोमन्वदमिंद्रअ
ग्नेर्मन्वेयमोमल्वअभितंनिर्ऋति॥येपञ्चाज्जुह्वति॥वायोःसवितः॥यउत्त
रतः॥धातादधातु॥अनंतवितहंब्रह्मपरंयुज्यतां॥येत्रियत्नं॥ततःअप्सु
ते॥धाम्नोधाम्नोराजन्नउद्नंमंप्रास्यत्याज्ञात्॥इतिचतुर्णांसप्तविंशात्या१८
वरुणायहोमःग्रहादिभ्यःपर्वं वा॥ततोभ्यातानोदिसंस्रावहोमांतं॥आचा रात्र
र्योपि स्वशाखोक्तविधिनाएवाभ्योपिदेवताभ्योस्वकुंडेकृत्वापूर्णाहुत्यं १७

तं प्राचीनंकर्मकुर्यात्॥सर्वत्रजागरणंकुर्युः॥तद्दिनेसर्वेषामुपवासोहविष्या
न्नंवा॥ ॥इत्यधिवासनं॥ ॥प्रातराचार्यःकुंडसमीपस्थकलशेषुसप्तमृदः
रु रोचनसर्षपकुंकुमकर्पूरचंदनागरुकस्तूरीजातीफलमुक्तागुग्गुलपंचपल्लव
वेतसान्क्षिप्त्वातज्जलैःसकुटुंबंयजमानंगुर्वर्त्विजोभिषिंचेयुः॥मात्स्ये॥त
तःप्रभातेविमलेसंजातेथगवांशतं॥ब्राह्मणेभ्यःप्रदातव्यंअष्टषष्टिश्चवा
पुनः॥पंचाशद्वाथषट्त्रिंशत्पंचविंशतिवापुनः॥ततोयजमानोगुर्वार्त्विग्भ्यः
ने कृतंदधिवासनसिध्यर्थंगवां।१००।९८।५०।३६॥२५॥वानिष्क्रयंवादक्षिणांद

त्वामुत्तमेहेममंगादियुतोसंपूज्यशांतिपाठवाद्यघोषेजायमानेआचार्यःपुत्राद्यन्वार
ब्धोयजमानः॥गोपुछंधृत्वापश्चिमतईशान्यामिमुखींगांवतारयेत्॥इरावतीतिव
सिष्ठोविप्रुन्मौस्त्रिष्टुप्॥गोरवतारणेविनियोगः॥तरयंतीमनुमंत्रयीत॥ॐइदंसलि
लंपवित्रंकुरुष्वमृताःपूताअमृतासंतुनित्यं॥मांतारयंतीकुरुतीर्थानिषेकंलोका
लोकंतरतेतीर्थतेच॥इति॥वापीकूपेत्सर्गेतुगांत्रिरुपरिभ्रामयेत्॥ततःसमुद्रा
दूर्मिर्बामदेवोगौस्त्रिष्टुप्॥समुद्रादूर्मिर्मधुमां०॥येवामिरोचनंदिवोवसिष्ठःसर्पानु
ष्टुप्॥येवामिरोचनंदिवः०॥इतिमंत्रंपठेत्॥ततःईशान्यांपरिगत्वाजानुदघ्नेज

रामः १५

लेगोपुछेनस्वशाखोक्तदेवऋषिपितृणांस्वपितृणांचतर्पणंकृत्वापौराणमंत्रैः
ता कुर्यात्॥तद्यथा॥पितापि मह श्चैवतथैवप्रपितामहः॥स्वस्वपत्नीसमेतास्ते
प्रीयंतांजलतर्पणात्॥अजातदंतायेकेचिद्येचगर्भेव्यवस्थिताःतेषामुधरणार्थो
यतउगोदकमश्नुते॥पितृन्यकाश्चयेस्माकंभ्रातरश्चसहोदराः॥गुरवोमातुलाः
पुत्राआचार्याःसखिबांधवाः॥तेषांपुत्राश्चपत्न्यश्चश्वशुरायेसपुत्रकाएतेषांपी
णनार्थायतउगोदकमश्नुते॥ब्रह्माद्यादेवताःसर्वेऋषयोमुनयस्तथा॥दिक्पा
लालोकपालाश्चग्रहदेवाधिदेवताः॥असुरायातुधानाश्चमातरश्चेडिकास्तथा॥

तेसर्वेतृप्तिमायांतुतडागोदकतर्पणैः॥विश्वेदेवास्तथादित्याः साध्याश्चैवमरुद्गणाः
क्षेत्रपीठोपपीठानि नदानद्यश्चसागराः॥पातालेनागपत्न्यश्चनागाश्चैवसपर्वताः
॥पिशाचागुह्यकाः प्रेतागंधर्वगणराक्षसाः॥पृथिव्यावारुणंतेजोवायुराकाशमेवच
॥दिविभूम्यांतरिक्षेचयेचपाताळवासिनः॥शिवःशिवस्तथाविष्णुःसिद्धिर्लक्ष्मीसरस्वती
॥तपोधनाश्चभगवानव्यक्तःपरमेश्वरः॥क्षेत्रौषधिलतावृक्षावनस्पत्यधिदेवताः
कपिलःशेषनागश्चैकानंतएवच॥अन्येजलचराजीवाआकाशगाश्चये॥ख्याताश्चनेकशश्चैव
तुर्दश्यामाश्चैवयेचान्येयमकिंकराः॥सर्वेपियक्षराजश्चपक्षि

णःपशवस्तथा॥श्वेदजोद्भिरजाजीवाअंडजाःरजाः॥आब्रह्मस्तंभपर्यंतंयेचान्येगोत्रिणस्तथा॥तेसर्वेतृप्तिमायांतुतडागोदकतर्पणैः॥सर्पव्याघ्रहतायेचश्वंगिदंष्ट्रिनखाग्निभिः॥अपुत्राअक्रियायेचअदत्ताधर्मवर्जिताः॥आमगर्भमृतायेचशस्त्रघातमृताश्चये॥संस्काररहितायेचरौरवादिषुगामिनः॥आब्रह्मस्तंभपर्यंतंदेवऋषिपितृमानवाःतृप्यंतुपितरः सर्वेमातृमातामहादयः॥अतीतकुलकोटीनांसप्तद्वीपनिवासिनां॥आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं॥पितृवंशेमृतायेचमातृवंशेचयेतथा॥गुरुश्वशुरबंधूनांयेचान्येबांधवास्मृताः॥क्रियालोपगताश्चैवजात्यं

२येचान्येबांधवायेचपैतृजन्मनिबांधवाः।इहांतेक्षतंचगताःकेचित्प्रेतगुह्यकतां स्थिताः॥२
धाःपंगवस्तथा॥विरूपाआमगर्भाश्चेज्ञाताः कुलेमम॥तेभ्योदत्तंतडागस्यजलमेत
त्कृतंतयैयात नासुचघोरासुजातीषुविविधासुच॥नरकेषुचघोरेषुपतितायेस्व
कर्मणा।तेषामुद्धरणार्थायजलमेतद्दाम्यहं॥औद्भिदेयेपितृवंशजाताःमातुस्त्र
थावंशभवामवामदीयाःवंशाहयेस्मिन्ममदासभूताभृत्यास्तथैवाश्रितसेवकाश्च॥
मित्राणिसख्यःपशवश्चवृक्षाःदृष्टाश्चस्पृष्टाश्चकृतोपकाराः॥जन्मांतरंयेममसंगता
श्चक्षेम्यसस्यप्रदकमेतद्दत्तु॥ततःआपोअस्मान्देवश्रवआपस्त्रिष्टुप्॥सूर्यसादीर्घत
मागौतमस्त्रिष्टुप्॥गोर्जलादुद्धरणेविनि०॥यदिर्मेहिंकरोतितदाहिंकृण्वतीजपेत्॥

ततःधौतवस्त्रेधृत्वादधिदूर्वागंधाद्यैस्तांगांसंपूज्यप्रार्थयेत्॥वत्सनांदुहिताचासौसं
सारार्णवतारिणी॥तीर्थेपुण्येहदेस्नाताप्रावयस्वजलाशयं॥अर्चितासिसुगंधे
नचंदनेनमयार्चितं॥सत्कीर्त्तिःसद्गतिःकर्तुःपावयस्वजलाशयं॥सर्वदेवम
यीयस्मात्पूजनीयासिरोहिणी॥सर्वकामदुघेधेनोसर्वपातकनाशनी॥सर्वांगैःस
र्वभावेनपावयस्वजलाशयं॥त्वयाकृतंपवित्रंतुत्रैलोक्यंसचराचरं॥अतोस्मा
कमिमंधेनोपावयस्व०इति॥ततःसामगायद्गोत्रेतोदद्यात्॥ततोवाद्यादिघोषेस
तिहरिद्राकुंकुमोक्तेनत्रिरत्नसूत्रेणजलाशयंवेष्टयेत्॥केचिद्दासमावेष्टयंति।

ततोयजमानोनवंश्वेतोष्णीषंशिरसिबध्नीयात्॥ अथाचार्यःवेद्यांस्थापितंनदीजल
१८ युतंपात्रीचतुष्टितमिर्घृतमादायजलस्थःसौवर्णौकूर्ममकरावगाधेजलेपूर्वाग्रे
ययोःप्रत्यङ्मुखैजलेक्षिपेत्॥ राजतौमत्स्यडुंडुभौदक्षिणप्रतीच्योरुदङ्मुखौ। तां
म्रोकुलीरमंडूकौप्राङ्मुखौवाययेत्॥ लोहंत्रिंशुमारंदक्षिणामुखमुदीच्यां॥ ततःस
ऋत्विगाचार्यउदङ्मुखः ग्रंनोदेवीरभिष्टयऽइत्यस्यामूचिगीतेनाथर्वणेनसाम्ना॥
पुनर्मामैत्विंद्रियंपुनरायुःपुनर्भगः॥ पुनरैविणमैतुमांपुनर्ब्राह्मणमैतुमां॥इति॥ राम
आपोहिष्ठेतितृचेनागाधेजलेन्युब्जीकृत्वातद्वस्त्रंतुलेक्षिप्तातामादायगच्छेत्॥ १८

हुमुत्सृजेनममेतिजलान्नायंपश्यन्जलंभस्मोनिक्षिपेत्। ततोमंत्रंपठेत्। वारुणंसर्वभूतेभ्यो

ततःकर्त्तोष्णीषंआचार्यायदत्त्वाकुशातिलहस्तो देवकृतस्यैनस्यत्वासर्वपापक्ष
यपूर्वकेत्यादिपूर्वोक्तंफलमुक्त्वा ममुंतडागादिजलान्नायंवरुणदेवत्यंस्नानपा
नावगाहनार्थंसर्वभूतेभ्योमयादत्तमिदंजलं॥ सोपानात्पततःस्वाताजलेचैव
निमज्जनात्॥ मरणेचास्थिभंगेचममदोषोनविद्यते॥ सर्वभूतानांतर्गतात्माआ अं
त्मीयपुत्रदाराद्युद्देशेनाप्युत्सर्गापरस्वापत्यभावाद्वस्वस्यपुत्रादेश्चतत्रजलपानादो
नदोषः॥ प्रपंनासत्रवशिष्टेससस्नानयायाच्च॥ ततोविप्रेभ्योदक्षिणांदत्त्वापूर्वोक्तमं
त्रैर्हिभ्यांतेभ्योमाषमक्तबलिंदद्यात्॥ अथनागयज्ञः॥ आचार्योभूतेषुयवेषुकुं

२ ततोमंत्रंपठेत्। सर्वभूतेभ्यउत्सृष्टंमयेतज्जलमूर्जितं। रमंतुसर्वभूतानिस्नानपानावगाहनैः। सामा
न्यंसर्वभूतेभ्योमयादत्तमिदंजलं। रमंतुसर्वभूतानिस्नानपानावगाहनैरिति॥ २

त्सर्गं निधायाभ्यर्च्य चूतपत्राष्टके॥अनंतं॥वासुकिं॥तक्षकं॥पद्मं॥शंखं॥महापद्मं॥
कंबलं॥कुलिकं॥इतिनामानिविलिख्यतानिकुंभेनिधायैकमाकृष्यतंनामानं॥ना
गंगादभ्रापंचदभ्राविंभ्रास्यन्यतमारात्रिमितायांयक्षियकाष्ठस्थूणायामावाद्यसंपूज्या
यंनागोस्यजलस्थरक्षकोस्त्वितिउक्त्वानागाःयथ्येवानमइतिसंपूज्यतछर्विलोदंच
क्रंनिरवायसंपूज्यप्रार्थयेत्॥ॐचक्रंसुदर्शनायव्यातंनागदंडंशिरोगतं॥अत्रविघ्न
स्वकर्त्तारंजहिदुष्टरिप्रिय॥ततःसामात्योयजमानोयष्टिं स्कंधेगृह्यत्वावाद्यघोषेणज राम.
लाशयंप्रदक्षिणीकृत्यजलमध्येकृतेवटेनीवतणगोमयदधिमध्वक्षतान्कुशान १९

दीजलानिपंचरत्नानिक्षिप्त्वाध्रुवाद्यौरितिहृदयंयष्टिंनिखनेत्॥इदंकूपवाप्योः॥
अथयजमानः॥महानदीजलानिजलेक्षिप्त्वापठेत्॥कुरुक्षेत्रंगयागंगाप्रभासंपु
ष्करंतथा॥एतानिपंचतीर्थानितडागेनिवसंतुमे॥दृशाणर्णासुरथासिंधुरथावर्त्तह
वहती॥एतानिपंचतीर्थानितडागेनिवसंतुमे॥वितस्ताकौशिकीसिंधुसरयूश्चस
रस्वती॥एतानिपंचतीर्थानि०॥यमुनानर्मदारेवाचंद्रभागाचदेविका॥एतानिपं
चतीर्थानि०॥गोमतीरावतीद्वेणेगंडकीसागरस्तथा॥एतानिपंचतीर्थानि०॥ततोज
लंस्पृष्ट्वापठेत्॥प्रपद्येवरुणंदेवंभर्गापतिमृजीतं॥याचितंदृष्टिमेपुण्यंसर्वपापा

पनुन्नये॥ सांनिध्यमत्रतोयेस्कृतवेशमदनुग्रहात्॥ रुद्रान्नपद्येवरदान्सर्वानप्युपद
स्वहंन्नमयंस्वमुमेपापंरक्षंतस्तेप्युमांसदा॥ आपःपुण्याःपवित्राश्चप्राणिनांप्राणदस्त
था॥ शमयंस्वपक्मेपापंतस्माद्रक्षंतुसर्वदा॥ इतितातः। ॐह्रियैनमः श्रियैनमः शान्त्यै
नमः॥ मेधायैनमः। लक्ष्म्यैनमः॥ इतिजलमात्रकाजलेक्षतपुंजेषुवामंस्थाप्यसंप्र
ति ज्य॥ आपोहिष्ठेत्यृक्त्रेणाविछिन्नगोदुग्धधारयाजलान्नायंत्रिःप्रदक्षिणीकृत्यनोबंदु
ग्धंकिंचिद्विप्रंयथेष्टंपाययेत् ततःउत्सर्गोत्तरंत्रिदिनंस्थापितदेवानांपंचोपचारैःपू राम·
जांपूर्वोक्तहोमंचप्रत्यहंगुर्वर्त्विजःस्वकुंडेचारब्धेयजमानेपूर्णाहुत्वाकर्मशेषंसमाप २०
यितिहु।

येयुः। अथचतुर्थकर्म॥ चतुर्थदिनेअमुकजलान्नायोत्सर्गांगभूतंचतुर्थकर्मक
रिष्ये॥ इत्यृक्त्वा॥ आचार्यंवृणुयात्॥ सएवाचार्यःयद्देवादेवहेडनमितिभूमिंस्पृ
श्यमानस्तोकेइतिगोमयेनोपलिप्यत्वांयज्ञेस्रुत्वियमित्युस्रिरव्यसदसस्पतिमिति
मदमुधत्स्वत्वामिधिहवामहइतिअभ्युक्ष्यअग्निर्मूर्धेत्यग्निंप्रतिष्ठाथब्रह्माणंत्वा।
हिरण्यगर्भइतिब्रह्मासदनंत्वा॥ ब्रह्मजज्ञानमितिब्रह्माणमुपवेश्यआपोहिष्ठे
तिमन्त्रमयंप्रणीतापात्रंनिधाय॥ अजिघ्रकलशंमह्यमितीक्षान्यांकुंभंसंस्थाप्यतत्र
वरुणंसंपूज्यकयानइत्यग्निंपरिस्तीर्यगायत्रेणत्वाछंदसासादयामीतिपात्राण्यासा

घविलोरराटमसीतिपवित्रेकृत्वाप्रोक्षणीरासादयेतिप्रोक्षणीपात्रेप्रणीतोदकमानी
योत्सृजवामहस्तेकृत्वोदगयनंकृत्वापात्राणिप्रोक्ष्याज्यस्थाल्यामाज्यमासिच्यदृषेत्वे
त्यधिश्रित्यनुर्जेत्वेत्यवेक्ष्यअग्निंदृतंपुरोदध इतिपर्यग्निंकृत्वात्रातारमिंद्रमि
तिरूक्वंघृताप्यानिन्नितासीतिकुशैःसंमृज्यप्रत्युष्टंरक्षइतिपुनःप्रताप्यनिधाय
उत्तिष्ठब्रह्मणस्पतइतिआज्यमुद्वास्यसवितुष्टेत्युंयोर्जेत्वेत्यवेक्ष्यप्रोक्षणींत्रिरुत्सृ त्सृ
ययस्यास्तेघोरआसमितिउपयमनकुशानादायसमिधाग्निमितिसमिधोभ्याधाय रात्र
विष्वतश्चक्षुरित्यग्नौसंदीप्यतेदेवाग्निसद्मायुरितिसंपृज्यदेवसवितःप्रोक्षणी। २२

जलेनाग्निंपर्युक्ष्यप्रणीतासुपवित्रेनिधायदक्षिणंजान्वाच्य ॐप्रजापतयेस्वाहेति
पूर्वाघारंकुरुत्वेंद्रायस्वाहेत्युत्तराघारंदक्षिणतोकृत्वाअग्नयेस्वाहेतिपश्चिमतः।सो
मायस्वाहेतिचक्षुषीकृत्वाव्याहृतिभिस्त्वंनोअग्ने०सत्वंनोअग्ने०अयाश्चाग्ने०
येतेशतं०उदुत्तमं०प्रजापतयेस्वाहेतिव्याहृतिभिर्जुहुत्वा॥घृणवारीनो।कुंफट्नमो
वरुणायेतिजलेनाग्निमभ्युक्ष्यगायत्र्या१५इमंमेवरुणेतिशतमाज्येनकृत्वो
व्याहृतिभिश्चकृत्वाअग्नयेस्विष्टकृतेस्वाहेतिजुहुयात्॥वरुणस्नानं॥दध्यक्षतकु
शाग्रक्षीरदूर्वामधुयवसर्वफलयुतंताम्रपात्रेवरुणार्घ्यंदत्वादंतासीतिगजदंता

श्वस्कानवल्मीकवराहोत्खाता गयगार तीर्थहृदसंगमगोष्ठमदोनवकुंभेभ्यः
स्वाआपोहिष्ठेतिनवभिर्जलेनापूर्यताभिरेवतडागादि वासिनंवरुणंस्नापयेत्
ततोगायत्र्यागोमूत्रं अष्टपलं॥गंधद्वारेतिगोमयंगुष्टार्धं॥आप्यायस्वेतिस्निग्धपलं
क्षीरं॥दधिक्राव्णइतिहिपलंदधि॥तेजोसीत्येकपलंघृतं॥देवस्यत्वेतिकुशो
दकमेकपले॥सर्वंचैकीकृत्यतेनापोहिष्ठेत्यभिषिंचेत्॥ततःपृथक्पृथक्पलं
पंचामृतैःस्वस्वमंत्रैःसरस्वतीभेषज्येनेतिपुष्पोदकेनहिरण्याक्षःसवितेति राम
रत्नोदकेनदेवस्यत्वेतिकुशोदकेनअग्नआयाहिवीतयइतिफलोदकेन २२

सावित्र्यागंधोदकेन॥ततोघटानांसहस्रेण १०००॥५००।२५०।१२५।६४।३२।१६।४
वास्नापयेत् ततःसुवर्णरौप्यताम्रकांस्यपित्तलमृन्मयैःकुंभैःततःसहदेवीव
चाव्याघ्रीबलातिबलाशंखपुष्पीसिंहीसुवर्चलाश्वगंधौषधिकुंभोदकेन॥ततो
यवगोधूमनीवारश्यामाकशालिप्रियंगुव्रीहिकुंभोदकेन॥ततोगोमयेनमृदा
कृतैःस्वस्तिकपद्मशंखोत्पलकलशाश्रीवत्सदर्पणनद्यावर्तैःपंचवर्णरजोभिर्वा
कृतभक्तबलिभिर्वरुणंनीराज्यगोजलमाचमनीयंकृत्वावेदमंत्रसमायुक्ते
यज्ञपात्रसमन्विते सर्ववर्णप्रभेदेववासमीतवनिर्मिते॥वस्त्रंदत्त्वा।शरीरंतेन

जानामिवेष्टान्नेवतदेवच॥मयानिवेदितंभक्त्याप्रतिगृह्यविलिप्यतामितिगंधं॥
तू ळमीपुष्पं॥सूर्योग्निचंद्रज्योतींषिविद्युदग्निस्तथैवच॥त्वमेवसर्वज्योतींषिदीपो
यंप्रतिगृह्यतामितिचत्वारिंशद्दीपान् धूपदीपादीनिनैवेद्यानिचदद्यात्॥इतिव
रुणस्नानं॥ततः मंत्रावप्राणानादिकृत्वादमंमेवरुणेतिपूर्णाहुतिंहुत्वाग्निसं
पूज्यविसृज्याचार्यादिभ्यःसुवर्णादिदक्षिणांतंदत्वा॥कलशोदकैर्यजमानोभि
षिक्तोवेद्यादिग्रहान् संपूज्यविसृज्याचार्यायदत्त्वायज्ञोपकरणंगुर्वर्त्विग्भ्योवि राम॰
भज्यदत्वाहेमपात्रींश्राय्यांवाआचार्यायदत्वा१०००॥१०८॥५०॥२०वाब्राह्मणान् २३

संपूज्यभ्रयसीदक्षिणांदत्वा॥यस्यस्मृत्येतिप्रमादात्कुर्वतामित्यस्यकाकर्मेश्वरार्प
णंकुर्यात्सुहृद्युतोभुंजीत॥कर्मांतेयज्ञपात्राणियज्ञोपकरणानिच॥ऋत्विग्भिश्च
समंदत्वामंडपंविभुजेयुनःहेमपात्रीचश्राय्यंचस्थापकायनिवेदयेत्॥ततःस
हस्रंविप्राणांअथवाष्टशतंतथा॥भोजयेच्चयथाशक्त्यापंचाशद्ब्राह्मणविंशतिः।अथं
तथा वाशक्त्याल्पधनविधिरुच्यते॥स्वल्पेप्येकाग्निवत्कार्यंविन्नाश्यदृतोद्विजः
।अधेनाचार्ययुक्तेत्रत्रयोदशीत्यर्थः।एकाग्नावाचार्यमात्रंवेत्यर्थः।प्रावृट्काल
शिशिरतोयमग्निष्टोमसमंस्मृतं॥वाजपेयातिरात्राभ्यांहेमंतशिशिरेस्मृतं।अश्व

मेधसमंप्राकुर्वसंतेसमयेस्थितं॥ग्रीष्मे पियौंस्थितंतोयंराजसूयाद्विशिष्यते
एतन्महाराजविशेषकर्म करोतियोंथप्रकृतिस्थितिः॥प्रयातिरुद्रालयमाप्लुप्
तः कल्पानेकोंदिविमोदतेच॥अमेनलोकान्समहस्त्रयादीन्भुक्त्वापरा
र्धेहयमंगनाभिःसहैवविलोःपरमंपदंयत्रयातिसद्योगतेषुभूपः॥ ॥इति
श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते जलाश
योत्सर्गः अथवृक्षपरिनिष्टे॥अथातोवापीकूपतडागंव्याख्यास्यामः पुण्यति
थिकरणेउदकसमीपेग्निमुपसमाधायवौंस्रंश्रपयित्वाज्यंनागांतंकृत्वाज्या
कृणंच स्या२

कृतीर्जुकृयात्समुद्रज्येष्ठेतिप्रत्यंचंततोहविषामभिजुकृयात्तत्त्वायामीतिपं
चत्वंनोअग्नेइममेवरुणेतिचनवमंस्विष्टकृतंमार्जनांतेधेनुंतारयेद्वती॥
र्यमाणामनुमंत्रयतेदंसलिलंपवित्रंकुरुष्वमुधाःपताअमृताःसंतुनित्यं॥
मांतारयंतीकुरुतीर्थाभिषेकंलोकाल्लोकं तरतेतीर्यतेचेतिगामन्वारब्धउ
तीर्यापोअस्मानित्यथापराजितायांदिशिपुछापयेत्सूयवसाद्गवतीदिभ्या
इतिहिंकृण्वतीतिसचैलकंगांकांचनशृंगौरौप्यखुरांकांस्यदोहांविप्रायद
द्यादितरांवायथाशक्त्यादक्षिणांततउत्सृजेद्देवपितृमनुष्याःप्रीयंतामिति

ब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीतेति॥शौनकः॥नवेतडागेरवाते
चवापीकूपसरित्सुच कुर्यात्सुविधिवद्धोमंसुध्येत्सुकालये॥तडागप
श्चिमेतीरेहोमशालामलंकृतां॥उपलेपादिकंतत्रप्रणीतास्थापनोत्तरं
मलिलेनचसंपूर्णंवाससावेष्टितंघटं॥मंडूकादीनिरौप्याणिसौवर्णानिजले
क्षिपेत्।ततश्चश्रपयित्वाथवारुणंपायसंपुनः।पयोदधिचमालोड्यसर्वेषां
चपुनःपुनः॥आपोहिष्ठेतिनवभिःस्रुवेणजुहुयाद्घृतं।आपोअस्मान्मं राम०
चमिश्चसमुद्रादूर्मिस्सुकृतः।अथसूक्तस्यजुहुयादवदाँ॥प्रमुवआपइस्य २५
नस्यसंपरा

पांसूक्तेननवकेनच॥अंबयोयंतिसूक्तेनलाजाहोमोविधीयते॥प्रतिदिक्
पत्यंचंकृत्वाप्रागारभ्यप्रदक्षिणं।नदितेक्षत्रमित्याद्यैर्मिश्रंघृताहुतीः
प्रसंमाजेद्वदितिसूक्तेनजुहुयाच्चरुं।अथस्विष्टकृतंकृत्वायजमानसबां
धवाः।अर्चिताआज्यधारान्निरपांचपरितोहरेत्।[illegible]तडागमध्येपांकुंभं
निधायस्वस्तिवाचयेत्।सौवर्णादीनिरौप्याणिविप्राणांप्रतिपादयेदिति।अ
त्रायंभविष्योत्तरशौनकपरिशिष्टाद्यनुसारेणवापीकूपोत्सर्गप्रयोगः।क

र्त्रौनकमतेपूर्वेद्युरुपवासंकृत्वापरेद्युर्देशकालौस्मृत्वा॥ममरुद्गणयग
मनेनाकल्पव्यापीस्वर्गवासपरार्धक्षयावाप्तीमहत्तपःप्रभृतिलोकगमनालोक
पर्वकविष्णुपदप्राप्त्यर्थंधनयशःश्रुतिपुष्ट्यायुष्यधर्मर्द्धिमहापातकशम
नार्थंकूपोत्सर्गंकरिष्येइतिसंकल्प्यगणेशापूजनंस्वस्तिवाचनंमातृकापूजनं
नांदीश्राद्धंकृत्वाआचार्यव र्णनादितुलादानवन्मंडपप्रतिष्ठांकृत्वायत्रसं॰ प
स्थितमितिसर्षपान्विकीर्यापोदृष्टेतित्रचेनप्रुचीवइतित्रचेनचघ्रोस्थाष्ट राम·
दिक्षुदिक्पालान्संपूज्यगिंनप्रतिष्ठाप्यईशान्यांवेद्यांनवग्रहाधिदेवताप्रत्यधि २६
ला

देवताविनायकादिपंचदेवताः संस्थाप्यकूपस्यचतुर्दिक्षुअष्टदलेषुपद्मेषु
मरीच्यादिरितिअद्भ्यश्चतुरः कुंभान्संस्थाप्यतत्रगोरोचनपंचरत्नानिअष्टमत्सर्वो
षधीर्निक्षिप्यतेषुतीर्थान्यावाह्यतेषुरुद्रंविष्णुरिति नमस्तेअस्त्वितगुह्यायनमोवि
स ष्णोअपांपते संनिध्यंकुरुदेवेशमुद्रादिहवेत्यवेतिविष्णुमाह्य॥वाप्युत्सर्गेस्मि वा
न्कुंभचतुष्टयेचतुरःसमुद्रानधिसंपूज्यवेद्यांलोकपालान् रुद्रंब्रह्माणंवि
ष्णुंचावाह्यगणानांत्वेतिगणेशांगंधद्वारामितिकमलांजातवेदसइत्यंबिकां॥
तआयजंतेतिभूतानि॥विश्वकर्म न्हविषेतिविश्वकर्माणंचावाह्यसौवर्णी

कूर्मराजतमत्स्यमुन्मर्यंमंडूकतांम्रकुलीरलोहशिंशुमारतीर्थवारिपंचरत्नयु
तांपात्रीमिमंमेवरूणेतिनमस्तेविश्वगुप्तायेतिपूर्वोक्तनवमंडलमध्येसंस्था
प्य।ओंनकमतेकुंभेसौवर्णम त्यादीन्संस्थाप्यसंपूज्यबलिंदत्वा॥त्रैलोक्ये
यानिभूतानीत्याद्युक्तरेवतानांपूजांकृत्वाबलिंदत्वा॥ तत्सर्वंपरत्रयंदत्वा
वटंरवातेयित्वातत्रा क्षतारभोज्यनिक्षिप्यवह्नियंक्षीरवृक्षंयजमानमात्मा
नमस्मिन्नधिवर्तुकर्यंपप्रोक्ष्यावटेनिखाघहरिद्रातैलाभ्यक्तमभिषिच्यसर्षपगो रामः
रोचनगुग्गुलूर्वानिंबपत्राणांगपोटंकंबध्नायुवासुवासाइतिवाससाछादयत २७
लि

त्रलोकपालान्संपूज्यध्रुवमरुंधतीं।।ततोयवमयंचरुंतूष्णींनिर्वपनादिकृत्वा
ज्यभागांतेग्रहादिहोमंकृत्वाव्यस्तसमस्तव्याहृतिभिश्च॥ततः समुद्रज्येष्ठेतिप्र
ङ त्यृचंचाज्याहुतीर्हुत्वापुनस्तानिस्त।स्वायामातिपंचभिःस्वंनोअग्नइतिद्वाभ्यामिमं
मेवरुणेतिद्वाभ्यांमंत्राणांनवाहुत्याउदुंबरसमिदाज्यचरुणाप्रत्येकमष्टोत्तर
शतं॥ओंनकमतेतुपयोदध्याज्यैःआपोहिष्ठेतितिसृभिरापोअस्मानितिपंच
भिःसमुद्रोर्मिरित्यृचेनाज्यंहुत्वाप्रसुवओंपइतिनवर्चेनप्रत्यृचंवारुणंपा
यसंचहुत्वाअंबयोयंत्र्यध्वनिरितिमंत्रेणलाजाँहुत्वानद्रितेसत्रमितिद्वा

नू

श्रिंशाद्भिर्घृतेङ्कृत्वाप्रसंमृज्यइतिप्रत्यृचंचसंजुहुयात्॥एवंचतुर्दिक्षुहोम॥
[redacted]तद्वागेष्वेवं॥एवंवरुणायेङ्कृत्वाहोमकालेतदिनक्तमित्यादिवरुणाय[redacted]
[redacted]जपंचकारयित्वास्विष्टकृदादिप्राय
श्चित्तहोमांतेदिक्पालेभ्योबलिदानंकृत्वामूर्धानंदिवइतिपूर्णाहुतिंकृत्वा
पूर्णपात्रविमोकांतेस्वर्णशृंगादालंकृतांगांसंपूज्ययजमानःसकुटुंबपुछेत्वा
रब्धः॥इरावतीतिवसिष्ठोगौस्त्रिष्टुप्॥अनेनकूपस्योपरिभ्रामयेत्॥इदंसलिलं रामः
पवित्रंपरुषस्परिप्रपूतमृतंसंतुनित्यंमातरयंतीकुरुतीर्योनिषेकंलोका २८

श्लोकंतरतेतीर्यतेचेतिअनुमंत्र्यसमुद्रादूर्मिःयोवाभिरोचनइतिमंत्रौपवित्वाई
त्रान्यांगोपुछेनवापीकूपोदकेनसर्वासंपिंडणांचतर्पणंकृत्वापूर्वोक्तपौरा
णमंत्रैश्चतर्पणंकृत्वाआपोअस्मान्॥सूयवसाद्गवतीतिचैशान्यांउत्थायपदा
हिंकुर्यात्॥हिंकृणूतीस्वनुमंत्र्यदधिर्वाभिःसंपज्यवस्त्रंनादुहितासित्वमि
तिपूर्वोक्तपंचभिःसंप्रार्थ्यगामाचार्यायदत्वात्रिरावृतेनसूत्रेणवाससाच
कूपंवेष्टयित्वाविचित्रपताकाकाष्ठयुतंकृत्वातामपात्रीमादाय॥शोनकम
तेसुजलकुंभमादाय॥मित्रंमित्राभिरुतानंधनिकोधनकांक्षिणं॥वैद्यो

रोगाग्निभूतानांशरण्यःशरणार्थिनामिति॥पुनर्मामैलंडिंयं॥आपोहिष्ठेतित्
चेन्नचागाधे जलेमुंजीकृत्यतद्सूत्रंनिजलेप्रक्षिप्यघृतिमादद्यात्॥ततःक
र्त्रादेशकालौसंस्मृत्वा अस्यांपूर्वेद्युरादिपूर्वोक्तफलमुत्कामन्नमुकंकूपादि
जलाशयंवरुणदेवत्यंस्नानपानावगाहनार्थंसर्वेभ्योभूतेभ्योदमुत्सृजेनममै
स्यत्कापवेत्॥सर्वभूतेभ्यउत्सृष्टंमयेतज्जलमर्जितं॥रमंतुसर्वभूतानिस्नानपा
नावगाहनैः॥सामान्यंसर्वभूतेभ्योमयादत्तमिदंजलं॥पापानाशय ततःस्नाता॥ राम.
जलेचैवनिमज्जनात् मरणेचास्थिभंगेवामदोषेनलिप्यते॥ततःकुशैस्त्रगं ३०
म

॥अथजलाशयोत्सर्गकालोभविष्योत्तरे॥तस्मिन्सलिलसंपूर्णेकार्तिकेच
विशेषतः॥तडागस्यविधिःकार्यःस्थिरनक्षत्रयोगतः॥मुनयःकेचिदिच्छंतिस्वनी
तेचोत्तरायणे॥नकालनियमस्तत्रसलिलंतत्रकारणं॥[illegible]मितिवचना
ज्जलसत्ताप्राधान्येनयथासंभवंकालशोधनंकार्यं॥दीपिकायां॥मानंडिंदूडुभु
द्वोमुरजिदयनेमाघषट्कस्यभृकूमूलाषाढोत्तराश्विश्रवणगुरुकरेपौष
शक्राजचांडे॥मैत्रेब्राह्मेचपूर्णा१५मदन१३रवि१२तिथौसद्वितीयात्तृतीयाका
र्यानोयप्रतिष्ठाज्ञगुरुसितदिनेकालभृद्वोसुलग्ने॥इत्यादिकालज्ञानंलुप्तसंव

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

उल्लेख
१४ त्सरोत्सवादिनिषेधश्चग्रंथांतरेभ्योज्ञेयः॥